इ, कर्म्मणि क्लिन्द्यते । ञ, क्लिन्दति क्लिन्दते । ङ, क्लिन्दते । रुदि रोदने । इति दुर्गादासः ॥

क्लिद, य ऊ इर् क्लेदे । इति कविकल्पद्रुमः । (दिवां-परं-अकं-वेट् ।) अन्तःस्थतृतीययुक्तः । क्लेद आर्द्रीभावः । य, क्लिद्यति वस्त्रं पयसा । ऊ, क्लेदिष्यति क्लेत्स्यति । इर्, अक्लिदत् अक्लेदीत् । असात् पुषादित्वात् ङ इत्यन्ये । इति दुर्गादासः ॥ (यथा, नारदपञ्चरात्रे ।

"सुवेशं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् ।

योनिः क्लिद्यति नारीणां सत्यं सत्यं हि नारद !"॥)

क्लिन्न, त्रि, (क्लिद् कर्त्तरि क्तः ।) आर्द्रम् । इत्यमरः । ३।१।१०५॥ भिजा इति भाषा । (यथा, रामायणे १ । ४२ । १९ ।

"गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम् ।

स्वर्गं गच्छेयुरत्यन्तं सर्व्वे च प्रपितामहाः" ॥)

क्लिन्नाक्षः त्रि, (श्लेष्मादिक्लेदेन क्लिन्ने क्लेदयुक्ते अक्षिणी यस्य ।) श्लेष्मादिना क्लिन्नचक्षुः । कफादिजनितक्लेदयुक्तं चक्षुर्यस्य सः । तत्पर्य्यायः । चुल्लः २ चिल्लः ३ पिल्लः ४ । कर्म्मधारयेण क्लिन्ने चक्षुषि क्ली । इत्यमरः । २ । ६ । ६० ॥

क्लिश, य उ ञ उपतापे । इति कविकल्पद्रुमः ॥ (दिवां-उभं-अकं-सकं च-वेट् । उदित्वात् क्ता वेट् ।) य ञ, क्लिश्यति क्लिश्यते । उ, क्लिशित्वा क्लिष्ट्वा । उपताप इह उपतप्तीभावः । तत्करणञ्च । क्लिश्यते न च निष्फलमिति हलायुधः । क्लिश्यते तपसा स्वर्गमपीति चतुर्भुजः । अन्ये त्वस्मात् परस्मैपदममन्यमानाः क्लिश्यन्नपि हि मेधावीति । प्रत्यासन्नतुषारदीधितिकरक्लिश्यत्तमो वल्लवीत्यादि च क्लिशं करोतीति कण्ड्वादित्वात् क्ये शत्रन्तनाङः । स्यपात्मनौ चिक्लिशतुः सखीताविति भट्टिप्रयोगश्च क्रैयादिकात् समादधते तद्धेयम् । क्रैयादिकस्य सकर्म्मकत्वात् । इति दुर्गादासः ॥

क्लिश, ऊ ग विबाधे । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-सकं-वेट् ।) ऊ, अक्लेशीत् अक्लिक्षत् । ग, "इत्यमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्" । इति दुर्गादासः ॥

क्लिशितः, त्रि, (क्लिश्+कर्त्तरि क्तः इट् वा ।) क्लिष्टः । इत्यमरः । ३ । १ । ९८ ॥

क्लिष्टः, त्रि, (क्लिश्+क्तः पक्षे नेट् ।) क्लेशयुक्तः । (यथा, मेघदूते ८४ ।

"इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति" ॥)

तत्पर्य्यायः । क्लिशितः २ । पूर्व्वापरविरुद्धवाक्ये, क्ली । तत्पर्य्यायः । संकुलम् २ परस्परपराहतम् ३ । इत्यमरः । ३ । १ । ९८ ॥ (यथा,-भागवते । १ । ६ । १२ ।

"जीवितुं नार्हथ क्लिष्टं विप्रधर्म्माच्युताश्रयाः" ॥)

क्लिष्टिः, स्त्री, (क्लिश्+भावे क्तिन् ।) क्लेशः । सेवा । इति धरणी ॥

क्लीतकं, क्ली, (क्लीव+क्तः । निपातनात् वलोपः । क्लीतमधार्ष्ट्यं कलतीति । कल क्षेपे+अन्येभ्योऽपीति डः ।) यष्टिमधुका । इत्यमरः ।२।४।१०९ ॥ (अस्य पर्य्यायाः यथा ।

"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका" ॥ इति वैद्यकरत्नमालायाम् ॥

"आनूपं स्थलजञ्चैव क्लीतकं द्विविधं स्मृतम्" ॥ इति चरके सूत्रस्थाने प्रथमेऽध्याये ।

"श्यामा गिरिह्वाञ्जनकी रसेषु
द्राक्षारसे सप्तलिकारसे च ।
घृतं पिबेत् क्लीतकसंप्रसिद्धम्
पित्तार्व्वुदी तज्जठरी च जन्तुः" ॥

इति सुश्रुते चिकित्सितस्थाने १८ अध्याये ।)

क्लीतकिका, स्त्री,(क्लीतकं ञ्रयोऽस्त्यस्याः ।"अत इनिठनौ" । ५ । २ । ११५ । इति ठन् रस्य लत्वम् ॥) नीलीवृक्षः । इत्यमरः । २ । ४ । ९४ ॥ (क्लीतक+स्वार्थे कन् टाप् अत इत्वं च । यष्टिमधुका ॥)

क्लीव, ऋ ङ अधार्ष्ट्ये । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) अन्तःस्थतृतीययुक्तः । अधार्ष्ट्यमप्रगल्भीभावः । ङ, शोकेन क्लीवते सर्व्वः । इति हलायुधः । ऋ, अचिक्लीवत् । इति दुर्गादासः ॥

क्लीव, ऋ ङ वान्तवत् । (भ्वां-आत्मं-अकं-सेट् ।) ऋ, अचिक्लीवत् । ङ, क्लीवते । वान्तवदिति क्लीवड अधार्ष्ट्ये इत्यर्थः । इति दुर्गादासः ॥

क्लीवः, पुं क्ली, (क्लीवड अधार्ष्ट्ये "इगुपधेति" । ३ । १ । १३५ । इति कः ।) स्त्रीपुरुषभिन्नः । तत्पर्य्यायः । षण्ढः २ नपुंसकम् ३ तृतीयाप्रकृतिः ४ शण्ढः ५ । इत्यमरः ।२।६।३९॥ तृतीयप्रकृतिः ६ षण्डः ७ सण्डः ८ शण्डः ९ । इति तट्टीका ॥ पुरुषत्वहीनः । तस्य लक्षणम् । यथा, उद्वाहतत्त्वे ।

"न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति ।
मेढ्रञ्चोन्मादशुक्राभ्यां हीनः क्लीवः स उच्यते" ॥

(यथा, पराशरसंहितायाम् ।

"नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते" ॥

क्लीवस्तु चतुर्द्दशप्रकारः । यथाह नारदः ।

"चतुर्द्दशविधः शास्त्रे षण्ढो दृष्टो मनीषिभिः ।
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् ॥
निसर्गषण्ढोऽनषण्डश्च पक्षषण्डस्तथैव च ।
अभिशापाद्गुरो रोगाद् देवक्रोधात् तथैव च ॥
ईर्ष्याषण्डस्तथाऽसेक्यो वातरेता मुखेभगः ।
आक्षिप्तो मोघवीजश्च शालीनोऽन्यापतिस्तथा ॥
तत्राद्यावप्रतीकार्य्यौ पक्षाख्यं माससमाचरेत् ।
अनुक्रमात् त्रयस्याथ कालः संवत्सरः स्मृतः ॥
ईर्ष्याषण्डादयो येऽन्ये चत्वारः समुदाहृताः ।
त्यक्तव्यास्ते पतितवत् क्षतयोन्या अपि स्त्रियाः ॥
आक्षिप्तमोघवीजाभ्यां कृतेऽपि पतिकर्म्मणि ।
पतिरन्यः स्मृतो नार्य्या वत्सरार्द्धं प्रतीक्ष्य तु ॥
शालीनस्यापि दृष्टस्त्री संयोगाद्भ्रुजयेद्ध्वजः ।
तं हीनवेगमन्यस्त्रीबालाद्यैरभिरूपाचरेत् ॥
अन्यस्यां यो मनुष्यः स्यादमनुष्यः स्वयोषिति ।
लभेत स्वाम्यं भर्त्ता नो एतत्कार्य्यं प्रजाकृते ॥
मत्यार्थं स्त्रियः सृष्टाः स्त्रीक्षेत्रं वीजिनो नराः ।
क्षेत्रं वीजवते देयं नवीजी क्षेत्रमर्हति" ॥)

...वः, त्रि, विक्रमहीनः । इत्यमरः । ३ । ३ । २१२ ।

क्लीदः

(यथा, महाभारते ३ । अर्ज्जुनाभिगमने ।३३।१३ ।

"कच्चिद्राजन् न निर्व्वेदादापन्नः क्लीवजीविकाम्" ॥

धर्म्मकार्य्यादौ निरुत्साहः । यथा, मनौ ३ । १६५ ।

"आचारहीनः क्लीवश्च नित्यं याचनकस्तथा" ॥)

क्लेदः, पुं, (क्लिद+भावे घञ् ।) आर्द्रम् । यथा,—

"पदस्खलितस्य पद्मस्य बन्धू वरुणभास्करौ ।
पदच्युतस्य तस्यैव क्लेदशोषकरावुभौ" ॥

इत्युद्भटः ॥ (यथा च याज्ञवल्क्यसंहितायाम् ।

"रसात्तु रसनं शैत्यं स्नेहं क्लेदं समार्द्दवम्" ॥

अत्र मिताक्षरा । "रसादुदकात् रसनेन्द्रियं शैत्यमङ्गानां स्नेहं स्निग्धतां मृदुतासहितं क्लेदमार्द्रताम्" ॥)

क्लेदनः, पुं, (क्लेदयति श्लेष्मादिभिरिति । क्लिद+णिच्+कर्त्तरि ल्युः ।) कफः । इति शब्दचन्द्रिका ॥ पञ्चप्रकारश्लेष्मान्तर्गतश्लेष्मविशेषः । इति सुखबोधः ॥ (भावे+ल्युट् । आर्द्रीकरणम् । यथा, भागवते ३ । २६ । ४३ ।

"क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोदनम्" ॥)

क्लेदा [न्] पुं, (क्लेदयति शीतरश्मिभिर्जनम् । क्लिद+णिच्+"श्वन् उक्षन् पूषन् प्लीहन्निति" । उणां १ । १५९ । इति कनिन् । न लोपे पूर्व्वदीर्घः ।) चन्द्रः । इत्युणादिकोषः ॥

क्लेदुः, पुं, (क्लेदयति इति । क्लिद+"भृ मृ शी ...हीति" । उणां १ । ११ । इति उन् ।) चन्द्रः । इति त्रिकाण्डशेषः । सन्निपातः । इति संक्षिप्तसार उणादिवृत्तिः ॥

क्लेश, ङ वधे । उपतापे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं उपतापार्थे अकं-सेट् ।) ङ,क्लेशते चिक्लेशे । धातुप्रदीपे तु क्लेश व्यक्तायां वाचीति मूर्द्धन्यान्तो दृश्यते । क्लेषते न दृष्टावाक्यमिति । हलायुधोऽपि । इति दुर्गादासः ॥

क्लेशः, पुं, (क्लिश्+भावे घञ् ।) दुःखम् । तत्पर्य्यायः । आदीनवः २ आस्रवः ३ । इत्यमरः ॥ (यथा, भगवद्गीतायाम् । १२ । ५ ।

"क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" ॥)

स तु पञ्चविधः । अविद्या १ विद्याविरोधिनी । अस्मिता २ अहममस्मीत्यहङ्कारः । रागः ३ इच्छाविशेषः । द्वेषः ४ वैरिता । अभिनिवेशः ५ मरणभयम् । इति कुसुमाञ्जलिः ॥ (तथाच पातञ्जले साधनपादे २ । २—३ ।

"समाधिभावनार्थः क्लेशतनूकरणार्थश्च । अविद्याऽस्मितारागद्वेषाभिनिवेशाः" ॥

"क्लेशतनूकरणार्थं इत्युक्तं तत्र के क्लेशा इत्याह । अविद्यादयो वक्ष्यमाणलक्षणाः पञ्च ते बाधनालक्षणं परितापमुपजनयन्तः क्लेशशब्दवाच्या भवन्ति । ते हि चेतसि प्रवर्त्तमानाः संस्कारलक्षणं गुणपरिणामं द्रढयन्ति" । इति तट्टीकाकृद्भागमार्त्तण्डः ॥) कोपः । व्यवसायः । इति मेदिनी ॥

क्लेशितः, त्रि, (क्लेशोऽस्य जातः । क्लेश+इतच् ।) क्लेशयुक्तः । यथा,—श्रृङ्गारतिलके ।

"निद्रा याता मम पतिरसौ क्लेशितः कर्म्मदुःखी" ॥